श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्वात्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्वात्रिंशः सर्गः ॥

## अर्जुनस्य भुजाभिर्नर्मदायाः प्रवाहस्यावरोधो रावणसञ्चितपुष्पोपहारस्य जले वहनं रावणादिनिशाचरैः सहार्जुनस्य युद्धं रावणं निगृह्यार्जुनस्य स्वनगरे प्रस्थानम्

नर्मदापुलिने यत्र राक्षसेन्द्रः स दारुणः।
पुष्पोपहारं कुरुते तस्माद् देशाददूरतः॥ **7.32.1** ॥

अर्जुनो जयतां श्रेष्ठो माहिष्मत्याः पतिः प्रभुः।
क्रीडते सह नारीभिर्नर्मदातोयमाश्रितः॥ **7.32.2** ॥

तासां मध्यगतो राजा रराज च तदार्जुनः।
करेणूनां सहस्रस्य मध्यस्थ इव कुञ्जरः॥ **7.32.3** ॥

जिज्ञासुः स तु बाहूनां सहस्रस्योत्तमं बलम्।
रुरोध नर्मदावेगं बाहुभिर्बहुभिर्वृतः॥ **7.32.4** ॥

कार्तवीर्यभुजासक्तं तज्जलं प्राप्य निर्मलम्।
कूलोपहारं कुर्वाणं प्रतिस्रोतः प्रधावति॥ **7.32.5** ॥

समीननक्रमकरः सपुष्पकुशसंस्तरः।
स नर्मदाम्भसो वेगः प्रावृट्काल इवाबभौ॥ **7.32.6** ॥

स वेगः कार्तवीर्येण सम्प्रेषित इवाम्भसः।
पुष्पोपहारं सकलं रावणस्य जहार ह॥ **7.32.7** ॥

रावणोऽर्धसमाप्तं तमुत्सृज्य नियमं तदा।
नर्मदां पश्यते कान्तां प्रतिकूलां यथा प्रियाम्॥ **7.32.8** ॥

पश्चिमेन तु तं दृष्ट्वा सागरोद्गारसन्निभम्।
वर्धन्तमम्भसो वेगं पूर्वामाशां प्रविश्य तु॥ **7.32.9** ॥

ततोऽनुभ्रान्तशकुनां स्वभावे परमे स्थिताम्।
निर्विकाराङ्गनाभासामपश्यद् रावणो नदीम्॥ **7.32.10** ॥

सव्येतरकराङ्गुल्या ह्यशब्दास्यो दशाननः।
वेगप्रभवमन्वेष्टुं सोऽदिशच्छुकसारणौ॥ **7.32.11** ॥

तौ तु रावणसन्दिष्टौ भ्रातरौ शुकसारणौ।
व्योमान्तरगतौ वीरौ प्रस्थितौ पश्चिमामुखौ॥ **7.32.12** ॥

अर्धयोजनमात्रं तु गत्वा तौ रजनीचरौ।
पश्येतां पुरुषं तोये क्रीडन्तं सहयोषितम्॥ **7.32.13** ॥

बृहत्सालप्रतीकाशं तोयव्याकुलमूर्धजम्।
मदरक्तान्तनयनं मदव्याकुलचेतसम्॥ **7.32.14** ॥

नदीं बाहुसहस्रेण रुन्धन्तमरिमर्दनम्।
गिरिं पादसहस्रेण रुन्धन्तमिव मेदिनीम्॥ **7.32.15** ॥

बालानां वरनारीणां सहस्रेण समावृतम्।
समदानां करेणूनां सहस्रेणेव कुञ्जरम्॥ **7.32.16** ॥

तमद्भुततरं दृष्ट्वा राक्षसौ शुकसारणौ।
सन्निवृत्तावुपागम्य रावणं तमथोचतुः॥ **7.32.17** ॥

बृहत्सालप्रतीकाशः कोऽप्यसौ राक्षसेश्वर।
नर्मदां रोधवद् रुद्ध्वा क्रीडापयति योषितः॥ **7.32.18**॥

तेन बाहुसहस्रेण सन्निरुद्धजला नदी।
सागरोद्गारसङ्काशानुद्गारान् सृजते मुहुः॥ **7.32.19**॥

इत्येवं भाषमाणौ तौ निशम्य शुकसारणौ।
रावणोऽर्जुन इत्युक्त्वा स ययौ युद्धलालसः॥ **7.32.20**॥

अर्जुनाभिमुखे तस्मिन् रावणे राक्षसाधिपे।
चण्डः प्रवाति पवनः सनादः सरजस्तथा॥ **7.32.21**॥

सकृदेव कृतो रावः सरक्तपृषतो घनैः।
महोदरमहापार्श्वधूम्राक्षशुकसारणैः॥ **7.32.22**॥

संवृतो राक्षसेन्द्रस्तु तत्रागाद् यत्र चार्जुनः।
अदीर्घेणैव कालेन स तदा राक्षसो बली॥ **7.32.23**॥

तं नर्मदाह्रदं भीममाजगामाञ्जनप्रभः।
स तत्र स्त्रीपरिवृतं वासिताभिरिव द्विपम्॥ **7.32.24**॥

नरेन्द्रं पश्यते राजा राक्षसानां तदार्जुनम्।
स रोषाद् रक्तनयनो राक्षसेन्द्रो बलोद्धतः॥ **7.32.25**॥

इत्येवमर्जुनामात्यानाह गम्भीरया गिरा।
अमात्याः क्षिप्रमाख्यात हैहयस्य नृपस्य वै॥ **7.32.26**॥

युद्धार्थं समनुप्राप्तो रावणो नाम नामतः।
रावणस्य वचः श्रुत्वा मन्त्रिणोऽथार्जुनस्य ते॥ **7.32.27**॥

उत्तस्थुः सायुधास्तं च रावणं वाक्यमब्रुवन्।
युद्धस्य कालो विज्ञातः साधु भो साधु रावण॥ **7.32.28**॥

यः क्षीबं स्त्रीगतं चैव योद्‌धुमुत्सहसे नृपम्।
स्त्रीसमक्षगतं यत् त्वं योद्‌धुमुत्सहसे नृप॥ **7.32.29**॥

वासितामध्यगं मत्तं शार्दूल इव कुञ्जरम्।
क्षमस्वाद्य दशग्रीव उष्यतां रजनी त्वया।
युद्धे श्रद्धा तु यद्यस्ति श्वस्तात समरेऽर्जुनम्॥ **7.32.30**॥

यदि वापि त्वरा तुभ्यं युद्धतृष्णासमावृत।
निपात्यास्मान् रणे युद्धमर्जुनेनोपयास्यसि॥ **7.32.31**॥

ततस्तै रावणामात्यैरमात्यास्ते नृपस्य तु।
सूदिताश्चापि ते युद्धे भक्षिताश्च बुभुक्षितैः॥ **7.32.32**॥

ततो हलहलाशब्दो नर्मदातीरगो बभौ।
अर्जुनस्यानुयात्राणां रावणस्य च मन्त्रिणाम्॥ **7.32.33**॥

इषुभिस्तोमरैः प्रासैस्त्रिशूलैर्वज्रकर्षणैः।
सरावणानर्दयन्तः समन्तात् समभिद्रुताः॥ **7.32.34**॥

हैहयाधिपयोधानां वेग आसीत् सुदारुणः।
सनक्रमीनमकरसमुद्रस्येव निःस्वनः॥ **7.32.35**॥

रावणस्य तु तेऽमात्याः प्रहस्तशुकसारणाः।
कार्तवीर्यबलं क्रुद्धा निर्दहन्ति स्म तेजसा॥ **7.32.36**॥

अर्जुनाय तु तत्कर्म रावणस्य समन्त्रिणः।
क्रीडमानाय कथितं पुरुषैर्भयविह्वलैः॥ **7.32.37**॥

श्रुत्वा न भेतव्यमिति स्त्रीजनं स तदार्जुनः।
उत्ततार जलात् तस्माद् गङ्गातोयादिवाञ्जनः॥ **7.32.38**॥

क्रोधदूषितनेत्रस्तु स तदार्जुनपावकः।
प्रजज्वाल महाघोरो युगान्त इव पावकः॥ **7.32.39** ॥

स तूर्णतरमादाय वरहेमाङ्गदो गदाम्।
अभिदुद्राव रक्षांसि तमांसीव दिवाकरः॥ **7.32.40** ॥

बाहुविक्षेपकरणां समुद्यम्य महागदाम्।
गारुडं वेगमास्थाय आपपातैव सोऽर्जुनः॥ **7.32.41** ॥

तस्य मार्गं समारुद्ध्य विन्ध्योऽर्कस्येव पर्वतः।
स्थितो विन्ध्य इवाकम्प्यः प्रहस्तो मुसलायुधः॥ **7.32.42** ॥

ततोऽस्य मुसलं घोरं लोहबद्धं मदोद्धतः।
प्रहस्तः प्रेषयन् क्रुद्धो ररास च यथान्तकः॥ **7.32.43** ॥

तस्याग्रे मुसलस्याग्निरशोकापीडसन्निभः।
प्रहस्तकरमुक्तस्य बभूव प्रदहन्निव॥ **7.32.44** ॥

आधावमानं मुसलं कार्तवीर्यस्तदार्जुनः।
निपुणं वञ्चयामास गदया गतविक्लवः॥ **7.32.45** ॥

ततस्तमभिदुद्राव सगदो हैहयाधिपः।
भ्रामयाणो गदां गुर्वीं पञ्चबाहुशतोच्छ्रयाम्॥ **7.32.46** ॥

ततो हतोऽतिवेगेन प्रहस्तो गदया तदा।
निपपात स्थितः शैलो वज्रिवज्रहतो यथा॥ **7.32.47** ॥

प्रहस्तं पतितं दृष्ट्वा मारीचशुकसारणाः।
समहोदरधूम्राक्षा अपसृष्टा रणाजिरात्॥ **7.32.48** ॥

अपक्रान्तेष्वमात्येषु प्रहस्ते च निपातिते।
रावणोऽभ्यद्रवत् तूर्णमर्जुनं नृपसत्तमम्॥ **7.32.49** ॥

सहस्रबाहोस्तद् युद्धं विंशद्बाहोश्च दारुणम्।
नृपराक्षसयोस्तत्र आरब्धं रोमहर्षणम्॥ **7.32.50** ॥

सागराविव सङ्क्षुब्धौ चलमूलाविवाचलौ।
तेजोयुक्ताविवादित्यौ प्रदहन्ताविवानलौ॥ **7.32.51** ॥

बलोद्धतौ यथा नागौ वासितार्थे यथा वृषौ।
मेघाविव विनर्दन्तौ सिंहाविव बलोत्कटौ॥ **7.32.52** ॥

रुद्रकालाविव क्रुद्धौ तौ तदा राक्षसार्जुनौ।
परस्परं गदां गृह्य ताडयामासतुर्भृशम्॥ **7.32.53** ॥

वज्रप्रहारानचला यथा घोरान् विषेहिरे।
गदाप्रहारांस्तौ तत्र सेहाते नरराक्षसौ॥ **7.32.54** ॥

यथाशनिरवेभ्यस्तु जायतेऽथ प्रतिश्रुतिः।
तथा तयोर्गदापोथैर्दिशः सर्वाः प्रतिश्रुताः॥ **7.32.55** ॥

अर्जुनस्य गदा सा तु पात्यमानाहितोरसि।
काञ्चनाभं नभश्चक्रे विद्युत्सौदामिनी यथा॥ **7.32.56** ॥

तथैव रावणेनापि पात्यमाना मुहुर्मुहुः।
अर्जुनोरसि निर्भाति गदोल्केव महागिरौ॥ **7.32.57** ॥

नार्जुनः खेदमायाति न राक्षसगणेश्वरः।
सममासीत् तयोर्युद्धं यथा पूर्वं बलीन्द्रयोः॥ **7.32.58** ॥

शृङ्गैरिव वृषायुध्यन् दन्ताग्रैरिव कुञ्जरौ।
परस्परं विनिघ्नन्तौ नरराक्षससत्तमौ॥ **7.32.59** ॥

ततोऽर्जुनेन क्रुद्धेन सर्वप्राणेन सा गदा।
स्तनयोरन्तरे मुक्ता रावणस्य महोरसि॥ **7.32.60** ॥

वरदानकृतत्राणे सा गदा रावणोरसि।
दुर्बलेव यथावेगं द्विधाभूतापतत् क्षितौ ॥ **7.32.61** ॥

स त्वर्जुनप्रयुक्तेन गदाघातेन रावणः।
अपासर्पद् धनुर्मात्रं निषसाद च निष्टनन् ॥ **7.32.62** ॥

स विह्वलं तदाऽऽलक्ष्य दशग्रीवं ततोऽर्जुनः।
सहसोत्पत्य जग्राह गरुत्मानिव पन्नगम् ॥ **7.32.63** ॥

स तु बाहुसहस्रेण बलाद् गृह्य दशाननम्।
बबन्ध बलवान् राजा बलिं नारायणो यथा ॥ **7.32.64** ॥

बध्यमाने दशग्रीवे सिद्धचारणदेवताः।
साध्वीति वादिनः पुष्पैः किरन्त्यर्जुनमूर्धनि ॥ **7.32.65** ॥

व्याघ्रो मृगमिवादाय मृगराडिव कुञ्जरम्।
ररास हैहयो राजा हर्षादम्बुदवन्मुहुः ॥ **7.32.66** ॥

प्रहस्तस्तु समाश्वस्तो दृष्ट्वा बद्धं दशाननम्।
सहसा राक्षसः क्रुद्धो ह्यभिदुद्राव हैहयम् ॥ **7.32.67** ॥

नक्तञ्चराणां वेगस्तु तेषामापततां बभौ।
उद्धूत आतपापाये पयोदानामिवाम्बुधौ ॥ **7.32.68** ॥

मुञ्चमुञ्चेति भाषन्तस्तिष्ठतिष्ठेति चासकृत्।
मुसलानि च शूलानि सोत्ससर्ज तदा रणे ॥ **7.32.69** ॥

अप्राप्तान्येव तान्याशु असम्भ्रान्तस्तदार्जुनः।
आयुधान्यमरारीणां जग्राहारिनिषूदनः ॥ **7.32.70** ॥

ततस्तैरेव रक्षांसि दुर्धरैः प्रवरायुधैः।
भित्त्वा विद्रावयामास वायुरम्बुधरानिव ॥ **7.32.71** ॥

**राक्षसांस्त्रासयामास कार्तवीर्यार्जुनस्तदा।**
**रावणं गृह्य नगरं प्रविवेश सुहृद्वृतः ॥ 7.32.72 ॥**

**स कीर्यमाणः कुसुमाक्षतोत्करै -**
**र्द्विजैः सपौरैः पुरुहूतसन्निभः।**
**ततोऽर्जुनः स्वां प्रविवेश तां पुरीं**
**बलिं निगृह्येव सहस्रलोचनः ॥ 7.32.73 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्वात्रिंशः सर्गः ॥